डॉ० प्रयागनारायणमिश्रः
लखनऊ

# अग्निष्टोमविमर्शः

वैदिकयज्ञानामनेकविधविभाजनेष्वन्यतमस्य सोमयागस्य याः सप्तसंस्थाः[1] प्रोक्तास्तासु ज्योतिष्टोमस्यान्तर्हितभागरूपेण लब्धप्रतिष्ठस्याऽग्निष्टोमाख्यसोम-यज्ञस्य सर्वप्रथमं स्थानमस्ति यतो हि सप्तविधसोमयागेषु प्रकृतियागत्वे-नाऽस्यैवाऽग्निष्टोमस्याऽक्षुण्णं महत्त्वं वरीवर्ति। अग्निष्टोमशब्दोऽयं स्तोमेन सार्द्धमग्निशब्दयोगेन घञ् प्रत्यये कृते निष्पद्यते। ऐतेरयब्राह्मणे तु महिदासेनैतरेयेण शब्दस्याऽस्याऽग्निष्टोमस्य निर्वचनपूर्वकमग्निष्टोमवैशिष्ट्यमेवमवोचि–

**'स वा एषोऽग्निरेव यदग्निष्टोमः तं यदस्तुवंस्तस्मादग्निस्तोमः। तमग्निस्तोमं सन्तमग्निष्टोम इत्याचक्षते, परोक्षेण परोक्षप्रिया इव हि देवाः।।**[2]

अर्थाद् योऽयमग्निष्टोमोऽस्ति स एष साक्षात् 'अग्निरेव' स्वशरीरमेव त्रिभिश्छन्दोभिस्त्रिभिस्सवनैश्च विभज्य क्रतोर्निष्पादितत्वात्। तं क्रतुरूपमग्निं यद् यस्मात् कारणाद् देवा अस्तुवन् तस्मादग्निविषयस्य स्तुतियुक्तत्वादयं क्रतुः 'अग्निस्तोमः' इत्येतन्नामकः। तन्नामयुक्तं क्रतुं परोक्षनाम्ना व्याहर्तुं सकारतकारयोः षकारटकारावादिश्य 'अग्निष्टोमः' इति वैदिका आचक्षते।[3]

अग्निष्टोमस्याऽपरसञ्ज्ञोपक्रमे वैदिकपरम्परायामन्यदपि यन् नामद्वयं दृष्टिपथमुन्मीलयति, ज्योतिष्टोमचतुष्टोमरूपेण तदप्यत्रावश्यमेव विचारणीयम्। केचन विद्वांसो ज्योतिष्टोमं सोमयागपर्यायमङ्गीकृत्य सोमयागस्य सप्तसङ्ख्यकान् भेदान्नेव ज्योतिष्टोमभेदमङ्गीचक्रुः, केचन च 'स्वतन्त्रस्य ज्योतिष्टोमस्य संस्था-विकल्पान्। आग्निष्टोम्यमुक्थ्यातिरात्रमिति' उक्त्वा ज्योतिष्टोमस्य भेदत्रयं वैदिका स्वीचक्रुः।[4] यतो हि पूर्वोक्तं भेदद्वयमपि अग्निष्टोमयज्ञस्तु प्रधानयज्ञरूपेणाऽथ-प्रकृतियागत्वेन सुप्रतिष्ठित एवाऽस्ति नाऽस्त्यत्र सन्देहलवः। अत एव ब्राह्मणग्रन्थेष्वङ्गीकृतं सरणिमवगाह्य वक्तुमिदं शक्यते यदग्निष्टोमयज्ञोऽयं निश्च-

---

१. लाट्यायनश्रौतसूत्रे ५/४/३४, आपस्तम्बीयश्रौतयागमीमांसायाम् पृ. ८

२. ऐतरेयब्राह्मणे १४/५ पृ. ५३६

३. तत्रैव सायणभाष्ये पृ. ५३६

४. वैदिकसाहित्य और संस्कृति का स्वरूप पृ. ३२६

Scanned with CamScanner

प्रचमेव ज्योतिष्टोमसञ्ज्ञया व्याहर्तुं शक्यते। अतो निश्चितं खलु यदग्निष्टोम एव ज्योतिष्टोमनाम्नाऽभिधीयते यथोक्तमत्रैतरेयब्राह्मणे–

'अथ यदेनमूर्ध्वं सन्तं ज्योतिभूतमस्तुवंस्तस्माज्ज्योतिस्तोमस्तं ज्योतिस्तोमं सन्तं ज्योतिष्टोम इत्याचक्षते परोक्षेण।'[1]

अर्थात् द्युलोकपर्यन्तमूर्ध्वस्थितं ज्योतिर्भूतमग्निं देवा अस्तुवन् अत एव ज्योतिस्तोमेन ज्योतिष्टोमोऽभवत् यथाऽवोचि सायणाचार्येणैतरेयब्राह्मणभाष्येऽपि–

'अयमग्निर्भूमिमारभ्य द्युलोकपर्यन्तमूर्ध्वावस्थितः तथा प्रकाश–मानत्वाज्ज्योतिर्भूतः। तं तादृशं देवा अस्तुवंस्तस्माज्ज्योतिस्तोमः। ज्योतिषः स्तोमः स्तुतिः यस्मिन् क्रतौ स क्रतुर्ज्योमिस्तोमः।'[2] एतादृशं क्रतुं परोक्षनाम्ना व्याहर्तुम् अग्निस्तोमेनाऽग्निष्टोमवत्सकारटकारयोः षकारटकारावादिश्य ज्योतिष्टोमोऽभवत्।

ज्योतिष्टोम सञ्ज्ञकोऽयमग्निष्टोमयज्ञो वसुरुद्रादित्यविश्वेदेवसञ्ज्ञकैश्चतु–र्भिर्देवैस्त्रिवृत–पञ्चदश–सप्तदश–एकविंशाऽख्यस्तोमचतुष्टयेन स्तवनाच्चतुष्टो–मसञ्ज्ञयाऽभिधीयते, यथोक्तमैतरेयब्राह्मणे –

तं यच्चतुष्ट्या देवाश्चतुर्भिः स्तोमैस्स्तुवंस्तस्माच्चतुस्तोमस्तं चतुस्तोमं सन्तं चतुष्टोम इत्याचक्षते परोक्षेण, परोक्षप्रिया इव हि देवाः[3]

वस्तुतो ज्योतिष्टोमस्योपर्युक्ते भेदद्वये याः संस्थाः स्वीकृता जातास्तास्सर्वा एव यज्ञसंस्थाः समापकस्तोत्रनाम्नाऽभिधीयन्ते। 'अत एव यज्ञा यज्ञा वो अग्नये' इत्यादि रूपेण प्रोक्तं सामगानं प्रस्तूय यस्य यज्ञस्य सम्पूर्तिर्विधीयते तस्याग्निष्टोम, इति सञ्ज्ञा लोके प्रथिता यथोक्तं ताण्ड्यब्राह्मणे–

"यज्ञायज्ञीय इत्यस्माग्नेय्यामुत्पन्नेनाऽग्निष्टोमसाम्ना समाप्तेरस्या–ग्निष्टोम इति नाम सम्पन्नम्"[4]

अतो ज्योष्टिोमेन सार्द्धं चतुष्टोमसञ्ज्ञयाऽपि लोकविश्रुतोऽयमग्निष्टोमाख्यः प्रकृतियागो निश्चप्रचमेव अग्निर्ज्योतिर्ज्योतिरग्निरित्यादिश्रुतिवचनमधिकृत्याऽग्नि–स्तवनवैशिष्ट्यादेवाऽग्निष्टोमनाम्ना सोमयागमूर्ध्निभाक्। अत एवाऽऽपस्तम्बश्रौत–सूत्रस्य रुद्रदत्तव्याख्यायामवोचि रुद्रदत्तेन –

---

१. ऐतरेयब्राह्मणे १४/५ पृ. ५४०

२. तत्रैव सायणभाष्ये पृ. ५४०

३. तत्रैव सायणभाष्ये पृ. ५४०

४. ताण्ड्यब्राह्मणे ६/१/१

Scanned with CamScanner

'यज्ञायज्ञियस्य स्तोत्रेऽग्निस्तुत्या यस्य संस्था सोऽग्निष्टोमः'[1]

वैदिकदेवेषु यथा' अग्निर्वै देवानामवमः' इत्युक्त्वा त्रिषधस्थोऽग्निः प्रथमः श्रेष्ठोऽङ्गीकृतः तथैव अग्निष्टोमोऽपि सोमयज्ञेष्वन्यतमः प्रथम आदर्शरूपश्च एकाहो यज्ञोऽस्ति यस्य सम्पादनं प्रायः पञ्चदिवसात्मकमङ्गीक्रियते। प्रधानत्वेन सुत्यादिवसमधिकृत्याऽहीनवर्गीयोऽयं प्रकृतियज्ञः तैत्तिरीयसंहितायाम्, तैत्तिरीय-ब्राह्मणे, शतपथब्राह्मणे, ऐतरेयब्राह्मणे, बौधायनश्रौतसूत्रे, आश्वलायनश्रौतसूत्रे, सत्याषाढश्रौतसूत्रे, कात्यायनश्रौतसूत्रेऽथ चाऽऽपस्तम्बश्रौतसूत्रेऽपि विशदतया निरूपितो द्रष्टुं शक्यते।[2] ताण्ड्यब्राह्मणेऽथ च गोपथब्राह्मणे तु विलक्षणधियाऽयमति–वैशिष्ट्येन व्याख्यायितो जातः यस्य निष्कृष्टार्थो मत्प्रणीते 'आपस्तम्बीय श्रौतयागमीमांसा' इत्याख्ये ग्रन्थे विशदतया षष्ठेऽध्यायेऽवलोकनीयः। वस्तुतः प्रकृतियज्ञत्वेनादर्शयज्ञस्याऽस्य विधिरतीव विस्तृतपरिमाणपेक्षते यस्य साङ्गोपाङ्गनिरूपणं शोधपत्रेऽसम्भवमङ्गीकृत्याऽत्र समासेनैव सूत्रशैल्यां केवलं कृष्णयजुर्वेदिनमाचार्यप्रवरमापस्तम्बमाश्रित्यैव आपस्तम्बश्रौतसूत्रधिया प्रस्तूयते।

अग्निष्टोमयज्ञविमर्शनप्रसङ्गे सर्वप्रथममस्याऽधिकारिचिन्तनं विहितम्। आचार्यप्रवरेण जैमिनिनाऽवोचि यत् त्रैवर्णिकेनाऽवश्यमेवाऽग्निष्टोमः सम्पाद्यः।[3] परन्तु वैदिकपरम्परानुसारेण अग्निष्टोमयज्ञस्याऽधिकारी तु केवलं स एव यजमानो भवति येन दर्शपूर्णमास–चातुर्मास्य–पशुवन्धादिकं सुष्ठु सम्पादितम्। यतो हि दर्शपूर्णमासप्रसङ्गे आपस्तम्बेनोक्तं **ताभ्यां संवत्सरमिष्ट्वा सोमेन यजते।**[4] आचार्यकात्यायनेनापि **दर्शपौर्णमासमाभ्यामिष्ट्वा अन्येन यजेत**[5] इत्युक्त्वा मतमिदं समर्थितम्। किन्तु सत्याषाढेन सार्द्धमेवाऽऽश्वलायनेन प्रोक्तं यद् दर्शपूर्णमासादिकात् पूर्वमपि यज्ञोऽयं सम्पाद्यो यदि चेद् यजमानेनाऽग्न्याधानं कृतम्।[6] अत आश्वालायनमतेऽग्न्याधानान्तरं दर्शपौर्णमासं विनैव यज्ञोऽयं सम्पादनीयः किन्तु बहुसमर्थितमतानुसारं तु कूष्माण्डमन्त्रपाठेन पुण्यतीर्थोदक–

---

१. आपस्तम्बश्रौतसूत्रे रुद्रदत्तव्याख्यायाम् १/२/३

२. तैत्तिरीयसंहितायाम् ५/२–४, ३/१–६, तथा ६/१–६, तैत्तिरीयब्राह्मणे १/१/१ तथा १/४/१ एवं ५–६, १/५/४, २/२८ शतपथब्राह्मणे ३–४, ऐतरेयब्राह्मणे १/१५ वौधायनश्रौतसूत्रे ६–१०, आश्वलायनश्रौतसूत्रे ४–६, सत्याषाढश्रौतसूत्रे ७–६, कात्यायनश्रौतसूत्रे ७–११ आपस्तम्बश्रौतसूत्रे १०–१३, धर्मशास्त्र का इतिहास भाग–१, पृ. ५४५–५५

३. जैमिनिसूत्रे ६/२/३१

४. आपस्तम्बश्रौतसूत्रे ५/२३/२

५. कात्यायनश्रौतसूत्रे ७/१/१

६. आश्वलायनश्रौतसूत्रे १/१/१–२

Scanned with CamScanner

स्नानपूतः कृतदर्शपौर्णमासाऽग्निहोत्रादिविप्र एवाऽग्निष्टोमाऽधिकारी भवितुमर्हति। अग्निष्टोमयागेन याजकः सर्वान् कामानवाप्नोति। वस्तुतोऽयं यागो न केवलं स्वार्थसाधको गरिष्ठः प्रत्युत सर्वार्थसाधकोऽस्ति।[1]

**'वसन्ते ज्योतिष्टोमेन यजेत'**[2] इत्यादिरूपेणोक्तेनापस्तम्बीयश्रौतसूत्रेणा–वगम्यते यदग्निष्टोमयागोऽयं वसन्ततौं शुक्लपक्षस्यैकादश्यामारभ्य पौर्णमास्यां सम्पूर्णतामुपयाति[3] 'सः प्रथमः सोमानाम्' अग्निष्टोमः प्रथमयज्ञः इत्यादिभिर्वचनैः प्रथमोऽयं यज्ञो निश्चप्रचमेव मीनमेषगते सूर्येऽर्थाद् वसन्ते सम्पाद्यः यतोहि श्रीमद्भगवद्गीतायां **मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः**[4] इत्युक्त्वा वसन्तर्तुरेव प्रथमत्वेन प्रथितः। आपस्तम्बेनाऽग्निष्टोमयज्ञानुष्ठानं पौर्णिमायामामायां वाऽभिहितम्

**'यदीष्ट्या यदि पशुना यदि सोमेन यजेतामावस्यायां वैव पौर्णमास्यां वा यजेत।**[5]

अतो वसन्ततौं मार्गशीर्षे वा एकादश्यामारभ्य एकादशीतः पञ्चमे प्रमुखे दिवसेऽमावस्यायां पौर्णिमायां वां विशेषतया सम्पाद्येऽस्मिन् पञ्चदिवसात्मकेऽहीने यागे सर्वप्रथमं विस्तृतदेवयजनं निर्माय पूर्वदिक्षुतः पश्चिमदिशिपर्यन्तं क्रमश उत्तरवेदिं, हविर्धानमण्डपम्, सदोमण्डपम्, ऐष्टिकवेदिञ्चाऽभिकल्प्योत्तरवेदितः पूर्वे यूपावटं संस्थाप्य अन्यच्च सर्वं यथायोग्येन कृत्वा ऋत्विग्वरणं सम्पाद्यते।

**'सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते यूनः स्थविरान् वाऽनूचानानूर्ध्ववाचोऽनङ्गहीनान्।**[6]

इत्थं यजमानः सकलयज्ञसम्भारादिकं गृहीत्वा शालामध्यवसति। अग्निष्टोमयागस्य प्रथमेऽहिन दीक्षणीयेष्टिः सम्पद्यते यस्याङ्गभूतकर्मरूपेण नवनीताञ्जनदीक्षा, औद्ग्रभणहोमः, कृष्णाजिनदीक्षा, यूपच्छेदनं महावीरसम्भरणा–दीनि कृत्यानि क्रमश ऐकैकशः सम्पाद्यन्ते।[7]

अग्निष्टोमस्य द्वितीयदिवसे प्रायणीयेष्टिपूर्वकं सोमक्रयं कृत्वाऽऽतिथ्येष्टिः

---

१. ताण्ड्यब्राह्मणे ६/३/१–२ तथा ८
२. आपस्तम्बश्रौतसूत्रे १०/२/२
३. सामवेदीयब्राह्मणों का परिशीलन पृ. १२
४. श्रीमद्भगवद्गीतायाम् १०/३५
५. आपस्तम्बश्रौतसूत्रे १०/२/८
६. तत्रैव १०/१/१
७. तत्रैव १०/४/१ से १०/१२/८, आपस्तम्बीयश्रौतयागमीमांसायाम् पृ. ८७–९२

Scanned with CamScanner

खण्डेष्टिः, तानूनप्त्रेष्टिः यथाविधि सम्पाद्य प्रवर्ग्योपसदाख्यं कर्मद्वयमायोज्यते।[1] यथोक्तमापस्तम्बश्रौतसूत्रे –

**सुपूर्वाह्णे पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति स्वपराह्ण अपराह्णिकीभ्याम्।**[2]

इत्थं प्रवर्ग्योपसदनन्तरं व्रतप्रैषं व्रतप्रदानञ्च सम्पाद्य द्वितीयो दिवसः पूर्णतापुपयाति।

अग्निष्टोमयज्ञस्य तृतीये दिवसे प्रातः कृत्यानि सम्पाद्य रजः शयोपसदिष्टि–ईराशयोपसदिष्टिश्चाऽऽयोज्येते। एतदनन्तरं शास्त्रोक्तविधिना वेदिमान् कृत्यं विहितम् –

**'अन्तरा मध्यमे प्रवर्ग्योपसदौ वेदिं कुर्वन्ति'**[3]

अतो वेदिनिर्माणपूर्वकं पौर्वाह्णिकं प्रवर्ग्यमथ च पौर्वाह्णिकोपसन्मध्ये वेदिसाधनं विधाय तृतीयदिवसकर्माणि सम्पूर्णतां लभन्ते।[4] आपस्तम्बश्रौत–सूत्रेऽग्निष्टोमयज्ञवेदिप्रमाणमेवभभिहितम् –

**तस्मात् पञ्चदशसु दक्षिणतः। एवमुत्तरतः। ते श्रोणी प्रथम निहितोच्छङ्कोः षट्विंशतिः पुरस्तात्। तस्माद्द्वादश दक्षिणतः एवमुत्तरतः। तावंसौ।**[5]

तैत्तिरीयसंहितायामपि महावेदिप्रमाणं निरूपयन्नुक्तमस्ति–

**त्रिंशत्पदानि पश्चात्तिरश्ची भवति षट्त्रिंशत्। प्राची चतुर्विंशतिः पुरस्तोत्तरश्ची।**[6]

अग्निष्टोमयागस्य चतुर्थो दिवसः प्रातरनुवाकेन सार्द्धमुपाकरणार्थमङ्गीकृत्य बहुभिरनुष्ठानैरग्निष्टोममुपकरोति। चतुर्थेऽस्मिन् दिवसे घर्मोत्सादनवेदिसिञ्चना–दिपूर्वकमग्निप्रणयनं कृत्वा हविर्धानमण्डपोपरवादिकं निर्माय हस्तसम्मर्शनप्रोक्षण–संस्कारादिपुरस्सरं सोमोपस्थानादिकं सम्पाद्यतेऽथ च पशूपाकरणार्थं शामित्रशालामधिगम्याङ्गनिष्कासनादिपूर्वकं प्रधानतयाऽङ्गावदानं क्रियते। एवं

---

१. आपस्तम्बश्रौतसूत्रे १० / २१ से ११ / २, आपस्तम्बीयश्रौतयागमीमांसायाम् पृ. ६३–६८
२. आपस्तम्बश्रौतसूत्रे ११ / ४ / १
३. तत्रैव ११ / ४ / ११
४. आपस्तम्बीयश्रौतयागमीमांसायाम् पृ. ६८–१००
५. आपस्तम्बश्रौतसूत्रे ११ / ४ / १३
६. तैत्तिरीयसंहितायाम् ६ / २ / ४ / ५

Scanned with CamScanner

पशुपुरोडाशं निर्वाप्य सोमरससम्पुष्ट्यर्थं वसतीवरीपरिहरणं कृत्वा सुब्रह्मण्यावाहनं क्रियते।[1]

अग्निष्टोमयज्ञस्याऽन्तिमेऽह्नि प्रमुखे पञ्चमे सुत्यादिवसे सोमसवनपूर्वकं सर्वं खलु विधिविधानेन सम्पाद्य यज्ञोऽयं समष्टिमुपयाति। अतः प्रधानयज्ञसम्पादनार्थं सोमादिकं सर्वमभिसर्ज्य सोमसवनाय ऋत्विक्–प्रबोधनं विहितम् एवं ऋत्विक्संसर्पणपूर्वकं सम्प्रति याग आरभ्यते। पात्रासादनं कृत्वा सर्वप्रथमं सामगानस्यैव विधानमस्ति। यज्ञसारथिविश्वरूपादिसामगानानन्तरम् अध्वर्युनिर्दिष्टो होता ऋग्वेदोक्तमन्त्रैः प्रातरनुवाकं पठति। प्रातरनुवाके विहितदेवानां स्तवनानन्तरं सुब्रह्मण्यस्तोत्रो वाच्यते। प्रातरनुवाकेन सार्द्धमेव निर्वापं संसर्ज्य पञ्चदेवेभ्यः पञ्चाहुतयो निर्वाप्यन्ते।

**"इन्द्राय हरिवते धाना इन्द्राय पूषण्वते करम्भं सरस्वत्यै भारत्यै परिवापमिन्द्राय पुरोडाशं मित्रावरुणाभ्यां पयस्यामिति।"**[2]

एवं हरिवते इन्द्रदेवाय धाना, पूषण्वते इन्द्राय करम्भं, सरस्वतीदेव्यै दधिः मित्रावरुणाभ्यां पायसं, इन्द्राय प्रधानदेवाय च एकादशकपालपुरोडाशं निर्वपेत्। निर्वपनानन्तरं सोमाभिषवरूपं प्रधान–कर्म आयोज्यते। सोमाभिषवप्रसङ्गे देवयजनमुपविश्य सर्वप्रथमं क्षुल्लकाभिषवः क्रियते, क्षुल्लकाभिषवाऽनन्तरं सवनीकृतान् सोमानधिषवणचर्मणि स्थाप्य ऐन्द्रवायव्यं, मैत्रावरुणं, शुक्रामन्थी, आग्रायणं तथा उक्थ्यसञ्ज्ञानि सप्तपात्राणि सोमेन धाराग्रहैः पूरयित्वा बहिष्पवमानस्तोत्रं पठ्यते। बहिष्पवमानस्तोत्रपाठानन्तरं सवनीयपुरोडाशं निर्वाप्य ग्रहप्रचारकृत्यं सम्पाद्यते।[3]

ग्रहप्रचाराद्यनन्तरं निरूढपशुबन्धविधिनाऽग्नये सवनीयपशोः निर्वापं कृत्वा सोमाहुतयो निर्वपेत्। सोमाहुत्यनन्तरं चमसोन्नयनं कृत्वा अभिधारणपूर्वकं शुक्रामन्थिप्रचारक्रमो विहितः। एवं शुक्रसञ्ज्ञकं सोमपात्रं गृहीत्वा ऋतुपात्रेषु द्रोणकलशेन सोम आपूर्यते। त्रयोदशमासेभ्यो सोमम्भ्यर्च्य शस्त्रस्तोत्रादिपूर्वकं पितृनिमित्तकं पिण्डदानं कृत्वा माध्यन्दिनसवनेऽपेक्षितानि कर्माणि सम्पाद्य दधिघर्मयागः क्रियते।[4] माध्यन्दिनपवमानर्कपाठं कृत्वा प्रातः सवन इव शेषकृत्यान् सम्पाद्य किञ्चित् कालानन्तरमेव तृतीयसवनस्यायोजनं भवति। तृतीयेऽस्मिन् सवने

---

१. आपस्तम्बीय श्रौतयागमीमांसायाम् पृ. १००–१०७
२. आपस्तम्बश्रौतसूत्रे १२/४/६
३. आपस्तम्बीय श्रौतयागमीमांसायाम् पृ. १०६–११०
४. तत्रैव पृ. १११–११४

Scanned with CamScanner

सर्वप्रथमं यजमानो लोकद्वारसामगानं करोति तदनन्तरं आदित्यस्थाल्या आदित्यपा
सोमं गृहीत्वा यागः क्रियते। एतदनन्तरं आर्भवपवमानसञ्ज्ञकं स्तोत्रमुक्त्
प्रसर्पण–चमसप्रचारकृत्यञ्च क्रियेते। कृत्येऽस्मिन् धिष्ण्याहुतेः पत्नीसंयाजस्य
विधानं प्राप्यते। पत्नीसंयाजानन्तरं सर्वप्रथममवभृथयागो विहितः। अस्मिन् कर्मणि
वेदिपरिमार्जनाऽग्निपरिस्तरणादिपूर्वकं वरुणदेवाय एककपालपुरोडाशं निर्वपेत।[1] ए
कृत्वाऽग्नीन् परिस्तीर्य निर्वपनकाले वारुणमेककपालं निर्वपति।[2] एवम् अवभृथस्ना
कृत्वा प्रकृतिशालायां उदयनीयेष्टिः सम्पाद्यते। उदयनीयेष्टौ प्रायणीयेष्ट्या ए
स्थाली प्रयुज्यते यथोक्तम् ऐतरेयब्राह्मणे–

'यस्यामेव स्थाल्यां प्रायणीयां निर्वपेत् तस्यामुदयनीयं निर्वपेत्।'[3]

प्रायणीयेष्टिदेवरूपेण अग्नि–सोम–सवितृ–पथ्यास्वस्ति–देवांश्चाऽभ्यर्च्य यज्ञस्याप्रस्रंसाय स्थैर्यार्थञ्च अदितियागस्य विधानं प्राप्यते यथाह आचार्यो महिदास ऐतरेयः–

**'आदित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो यज्ञस्य धृत्यै यज्ञस्य बर्सनद्ध्यै यज्ञस्याऽप्रस्रंसाय'**[4]

अतः 'प्रायणीयावदुदयनीया' इतिमतमाश्रित्य प्रायणीयावदेव उदयनीयायामपि आदित्यश्चरुर्विहितः। उदयनीयानन्तरमनूबन्ध्यायागोऽपि विहितो दृश्यते। अनूबन्ध्यायागे उदवसानीयेष्टिरनुष्ठीयते यस्मिन् पञ्चकपालमष्टकपालं वाऽऽग्नेय पुरोडाशं निर्वपेत् एवमुदयनीयेष्टि–पूर्वकं यज्ञं सम्पाद्य ऋत्विग्भ्यो दक्षिणादानस्याऽपि व्यवस्थाऽस्ति। केचन आचार्याः माध्यन्दिनसवनान्तरमेव दक्षिणाविधानं कुर्वन्ति।[5]

यतो हि यज्ञोऽयं षोडशऋत्विग्भिरायोज्यतेऽतः सर्वेभ्यो यथायथं विभज्य गोधनादिदक्षिणारूपेण देयः। दक्षिणदानस्य क्रम आपस्तम्बेनैवमभिहितः–

**'यावदाध्वर्यवे ददाति तस्यार्द्धं प्रतिप्रस्थात्रे तृतीयं नेष्ट्रे चतुर्थमुन्नेत्रे।'**[6]

दक्षिणायां यथाशक्तिगवादीनां दानं विधीयते। गोसङ्ख्यादिविषये

---

१. आपस्तम्बश्रौतसूत्रे १३/१६/१–१०
२. तत्रैव १३/१६/२–३
३. ऐतरेयब्राह्मणे २/५ पृ. ७१
४. तत्रैव २/५ पृ. ७३
५. आपस्तम्बश्रौतसूत्रे १३/५/१
६. तत्रैव १३/५/१२

Scanned with CamScanner

प्रोक्तमापस्तम्बश्रौतसूत्रे–

**'सन्नेषु नाराशंसेषु दक्षिणा ददाति। बह्वपरिमितं सप्तैकविशंतिः षष्टिः, शतं, द्वादशशतं सहस्रं सर्ववेदसं वा'[1]**

कैश्चित्तु दक्षिणारूपेणाऽन्याऽपि सम्पत्तिः स्वीक्रियते। दक्षिणानन्तरं सहस्रेभ्यो ब्राह्मणेभ्यो भोजनपर्याप्तमन्नादिकं समर्पयितुं सङ्कल्पः क्रियते यथाऽवोच्याचार्येणाऽऽपस्तम्बेन–

**'अग्निष्टोमस्य समृद्धये यथासम्पन्नेन भोजनपर्याप्तेनाऽन्नेन सहस्रं ब्राह्मणानहं तर्पयामि'[2]**

एवमुक्तविधिना सर्वं यथायथं सम्पाद्य बह्वृचब्राह्मणाय अभिक्षायागमनुष्ठीय इडान्तपर्यन्तं सर्वं यथायथं कृत्वा नखकेशश्मश्रुकर्तनपूर्वकं धाताऽनुमतिराका सिनीवलीकुहूसञ्ज्ञकेभ्यः पञ्चदेवेभ्य आज्याहुतिं हुत्वा प्रदीप्ताऽग्निं व्यवस्थाप्य निवासस्थानं प्रत्यायाति।[3] गृहमागत्य अरणिमन्थनपूर्वकमग्निं प्रज्वाल्य अष्टकपालपुरोडाशात्मके उदवासानीयेष्टौ अग्निविष्णुभ्यो हुत्वा प्रातः सायमग्निहोत्रं कर्तव्यम्।

इत्थं विधिपूर्वकं यज्ञायज्ञीयस्तोत्रेणाऽग्निमभ्यर्च्याऽस्य सकलफलवतो महतो यज्ञस्याऽनुष्ठानमिदं पूर्णतामुपयाति।।

***

---

१. आपस्तम्बश्रौतसूत्रे १३/५/१

२. कात्यायनयज्ञपद्धतिविमर्शे पृ. २६८

३. कात्यायनश्रौतसूत्रे १०/६/२४–२६,
आपस्तम्बश्रौतसूत्रे १३/२५/६

Scanned with CamScanner